# कठोपनिषद् एवं रहस्यतत्त्वम्

*प्रो. पारसनाथ द्विवेदी*

**कठोपनिषत्परिचयः**

कृष्णयजुर्वेदीयकठशाखीया कठोपनिषत्। कठो नाम वैशम्पायनान्तेवासी। वैशम्पायनान्तेवासिनो नव, आलम्बिः पलङ्गः कमलः ऋचाभः, अरुणिः ताण्ड्यः, श्यामायनः, कठः कलापीति। वैशम्पायनस्य चरक इत्याख्या। तत्सम्बन्धात् तदन्तेवासिनोऽपि चरका इत्युच्यन्ते। **कलापिवैशम्पायनान्तेवासिभ्यश्च** (पा.सू. 4.3.104) इति सूत्रे काशिकायामुक्तम्।

**हरिद्रुरेषां प्रथमस्ततश्छगलि तुम्बुरू।**
**उलपेन चतुर्थेन कालापकमिहोच्यते।**
**आलम्बिश्चरकः प्राचां पलङ्ग कमलावुभौ।**
**ऋचाभारुणि ताण्ड्याश्च मद्ध्यगीयास्त्रयोऽपरे।**
**श्यामायन उदीच्येषु उक्तः कठकलापिनोः।**

हरिद्रुः, छगलिः, तुम्बुरूः, उलप इति कलाप्यन्तेवासिनः। अपरे वैशम्पायनान्तेवासिनः पूर्वेचत्वारोऽपि वैशम्पायनशिष्यशिष्या एव।

कठेन ऋषिणा प्रोक्तमित्यस्मिन्नर्थे तेन प्रोक्तमित्यस्मिन् अधिकारे "**कलापिवैशम्पायनान्तेवासिभ्यश्च** (पा.सू. 4.3.104) इति सूत्रेण णिनिः। तस्य **कठचरकाल्लुक** (पा.सू. 4.3.107) इति सूत्रेण लुग् भवति। एवं कठेन प्रोक्तमधीते वेद वेति विग्रहे "तदधीते तद्वेद (पा.सू. 4.2.59) इति सूत्रेण तदध्येतृवेदितृप्रत्ययोऽण्। तस्य प्रोक्ताल्लुगिति सूत्रेण (पा.सू.4.2.64) लुक्। एवञ्च प्रोक्ता ऋषिः कठः तत्प्रोक्तवेदभागोऽपि कठः तदध्येता तद्वेदितापि कठः कठ एवं काठः, स एव काठकः, स्वार्थिकाणन्तात् स्वार्थे कः। अथवा कठ एव कठकः, स्वार्थे कः, स एव काठकः स्वार्थे अण्। एवञ्चेयं शाखा कठकाठकशब्दाभ्यामुच्यते कठप्रोक्तत्वात्। कठेन ऋषिणा प्रोक्ता न तु विरचिता कृता वेति कठशाखा तदन्तर्गता इयमुपनिषत् ब्रह्मविद्या।

**उपनिषत्पदार्थः**

उपनिषद् ब्रह्मविद्योच्यते। उप नि पूर्वकाद् विशरणगत्यवसादनार्थक सद्लृ धातोः कर्तरि क्विपि प्रत्यये कृते उपनिषद् पदं निष्पद्यते। संसारबीजस्यानादेरज्ञानस्य मायासंज्ञकस्य विशरणाद् हिंसनाद् विनाशनाद् वा उपनिषद् विद्या। उपनिषादयति संसारमूलमविद्यामित्यर्थे वा अन्तर्भावितप्रेरणार्थमादाय कर्तरि क्विपि उपनिषच्छब्दो निष्पाद्यते। उपनिषादयति अवसादयति शिथिलयति जराजन्मादि दुःखबन्धनमिति वा व्युत्पत्त्या उक्तधातोः कर्तरि क्विप्। अथवा उपनिषादयति ब्रह्म गमयतीति ब्रह्मविद्योपनिषद्। जराजन्मादिसंसारदुःख-शैथिल्यापादकत्वात् अग्निविज्ञानाद्यपि तथाविविधोपासनाद्यपि उपनिषच्छब्देनोच्यते। एतत् सर्वमुपपादितं कठोपनिषद्भाष्यभूमिकायां श्रीमच्छंकरभगवत्पादैः। उपनिषच्छब्दो ब्रह्मविद्यावाचकस्तथापि तादर्थ्यात् ग्रन्थेऽपि प्रयुज्यते।

**कठोपनिषद्वैशिष्ट्यम्**

मृत्युनचिकेतःसंवादरूपातिविशिष्टेयमुपनिषत् योग्याधिकारिलक्षणविषयस्तुतितत्स्वरूपतत्प्रतीकालम्बन-साधनयोगफलादि सम्यगुपदेशात्। पितृवचनसत्यतापालनाय यमभवनं गतो नचिकेता ब्रह्मलोके गते यमे ब्रह्मविद्याचार्ये तत्र तिस्रो रात्रीरुवास। यमश्च प्रत्यागतः 'ब्राह्मणोऽतिथिरग्निरिव गृहेऽनश्नन्नुवास' इति प्रकृतिभ्यः श्रुत्वा तं

पाद्यार्घ्यादिभि: सम्पूज्य प्रसादयन् तिस्रो रात्री: प्रति त्रीन् वरान् वृणीष्वेत्युवाच तिस्रो रात्रीर्यदवात्सीर्गृहे मे इत्यादिना। अतिमेधावी नचिकेता: प्रथमेन पितु: सौमनस्यं द्वितीयेन स्वर्गीयमग्निविज्ञानं वव्रे। तृतीयेन तु आत्मतत्त्वम्। येयं प्रेते विचिकित्सा... इत्यादि वाक्येन।

प्रथमद्वितीयवरयोर्विषय: संसाररूप एव पितृपुत्रस्नेहादिर्नात्मतत्त्वविषय:। नचैतावता वरद्वयविषयेण संसारप्राप्ति-लक्षणेन परमपुरुषार्थसिद्धि:। तस्य परमपुरुषार्थस्यात्मरूपस्य मोक्षस्य आत्मयाथात्म्यनिश्चयज्ञाप्यत्वात्।

नन्वाकीटपतङ्गेभ्य आब्रह्मणश्च प्रसिद्ध एवाहमर्थ आत्मा किमिति जिज्ञासा विषय: स्यात्। सर्वो हि लोक आत्मानं प्रत्येति अहमस्मीति न संदिग्धे अहं वा अनहं वेति। न विपर्यस्यति नाहं वेति। अत: असंदिग्धा विपर्यस्तात्मविषयकनिश्चयसद्भावात् तृतीयवररूपेणात्मतत्त्वजिज्ञासा व्यर्थेतिचेन्न प्रेतात्मनि विचिकित्सा दर्शनात्। मृतोऽपि आत्मा परलोकसम्बन्धी शरीरादिभ्योऽतिरिक्तोऽस्ति नास्तीति वा सर्वलोकसिद्धसंशयसद्भावात्। न च तस्य परलोकसम्बन्धिताज्ञानं प्रत्यक्षेणानुमानेन वा कर्तुं शक्यम्। आवश्यकञ्च तत् परम पुरुषार्थसाधनत्वात्। एवं विजानन् विमृशन् समर्थमाचार्यं वक्तारं कालञ्चोपयुक्तं मन्वानो नचिकेता: परमबुद्धिमान् तृतीयवररूपेणात्मयाथात्म्यविज्ञानमेव ययाचे। आचार्येण यमेन बहुधा ऐश्वर्यादिभि: प्रलोभ्यमानोऽपि न विचचाल। अत: परमप्रीत आचार्य: शिष्यबुद्धिं प्रश्नञ्च प्रशस्यास्मै आत्मतत्त्वमुपदिदेश।

तत्र नचिकेतस: शिष्यस्य बुद्धिप्रशंसाप्रसङ्गे श्रेय:प्रेयोविभागेन विद्याविद्याविषयविभागं प्रदर्शयन्नाचार्य: ज्ञानकर्मनिष्ठाद्वयं प्रसिद्धं सप्रयोजनं परस्परं विपरीतलक्षणम् नैकपुरुषेण सहानुष्ठेयं स्पष्टीकरोति।

**अन्यच्छ्रेयोऽन्यदुतैवप्रेय: ते उभे नानार्थे पुरुषं सिनीत:।**
**तयो: श्रेय आददानस्य साधु भवति हीयतेऽर्थाद्य उ प्रेयो वृणीते** (कठ. 1.2.2.)
**श्रेयश्चप्रेयश्च मनुष्यमेत: तौ सम्परीत्य विविनक्ति धीर:।**
**श्रेयो हि धीरोऽभि प्रेयसो वृणीते प्रेयो मन्दो योगक्षेमाद् वृणीते॥** (कठ. 1.2.2)

मन्दोऽल्पबुद्धि: विवेकासामर्थ्यात् लौकिकाभ्युदयलक्षणपशुवित्तपुत्रादिरूपं प्रेयो वृणीते। तद् विपरीतं मेधावी विवेकी प्रेय: परित्यज्य मोक्षरूपं श्रेयो वृणीते। तत्राविद्या प्रेयोविषया विद्या श्रेयोविषया। उभे परस्परविलक्षणे स्वरूपफलादिभेदात्।

**दूरमेते विपरीते विषूची, अविद्या या च विद्येति ज्ञाता।**
**विद्याभीप्सिनं नचिकेतसं मन्ये न त्वा कामा वहवोऽलोलुपन्त॥** (कठ. 1.2.4)

श्रेयो नि:श्रेयसं मोक्ष उच्यते। तच्च विद्यालभ्यम्। विद्या चात्मयाथात्म्यनिश्चय:। स च जीवात्मपरमात्मनेरैक्यबोध:। श्रेय:साधनत्वात् विद्यापि श्रेय एव। प्रेय: प्रियतरं लौकिकाभ्युदय वित्तपुत्रादिलोकलाभ:। तत् साधनमविद्या। सा च शास्त्रविहितं विधिनिषेधात्मकं कर्म स्वर्गादिफलम्। यद्यपि आत्मैव प्रियतम: तथापि लोके अभ्युदय एव प्रीतिप्रवृत्तिदर्शनात्तस्यप्रेयस्त्वम्। अतिशयेन प्रशस्यं श्रेय:। प्रशस्य शब्दादतिशायनेऽर्थे द्विवचन विभज्योपपदे तरबीयसुनौ (पा.सू. 5.3.57) सूत्रेण ईयसुन् प्रत्ययो भवति। प्रशस्यस्य श्र: (पा.सू. 5.3.60) सूत्रेण प्रशस्यशब्दस्य श्रादेश:। श्रेय:शब्दो निष्पद्यते। ज्य च (पा.सू. 5.3.61) इत्यनेन ज्यादेशे ज्याय: शब्दनिष्पत्ति:। एवमतिशयेन प्रियमित्यर्थे प्रियशब्दात् उक्तसूत्रेणातिशायनेऽर्थे ईयसुनि कृते, प्रियशब्दस्य प्रियस्थिरस्फिरोरूबहुलगुरुवृद्धतृप्तदीर्घवृन्दारकाणां प्रस्थस्फवर्बंहिगर्वर्षित्रब्द्राघिवृन्दा: (पा.सू. 6.4.157) इति सूत्रेण प्रादेशे प्रेय:शब्दो निष्पद्यते।

दूरमेते विपरीते विषूचीत्यादिना मन्त्रेणोभयोर्विद्याविद्ययो र्विवेकाविवेकात्मकत्वात् अन्योन्यव्यावृत्तरूपत्वात् संसारमोक्षफलकत्वात् तम:प्रकाशवद्विरुद्धस्वभावत्वाद् एकाधिकरणावृत्तित्वाद् एकाधिकारिणा समुच्चित्य

विधातुमशक्यत्वाद् एकेनान्यतरपरित्यागोऽपेक्षितः। तत्र तयोरेकस्य विद्यारूपस्य विद्यालभ्यस्य श्रेयसो ग्रहणे साधु भवति। त्वंच नचिकेताः श्रेयोऽर्थी बहुप्रदीयमानकामालोलुपः प्रशस्यतर इति तत्रत्य वाक्यसन्दर्भाभिप्रायः। विद्याविद्याविषयविभागस्तयोः समुच्चयासंभवश्चैतत् सर्वं गीताभाष्ये प्रारम्भ एव भगवत्पादैः स्पष्टं प्रतिपादितम्।

**तं दुर्दर्शं गूढमनुप्रविष्टं गुहाहितं गह्वरेष्ठं पुराणम्।**
**अध्यात्मयोगाधिगमेन देवं मत्वा धीरो हर्षशोकौ जहाति॥** (कठ. 1.2.12)
**एतच्छ्रुत्वा संपरिगृह्य मर्त्यः प्रवृह्य धर्म्यमणुमेतमाप्य।**
**स मोदते मोदनीयं हि लब्ध्वा विवृतं सद्म नचिकेतसं मन्ये॥** (कठ. 1.2.13)

इति मन्त्राभ्यामात्मतत्त्वमतिगूढं रहस्यतमं दुर्दर्शं तद्दर्शनं सर्वदुःखादिप्रमोक्षसाधनं मोक्षफलञ्च दर्शयति श्रुतिः। एवमत्र निष्कर्षः, आत्मतत्त्वं रहस्यभूतमति प्रशस्तं श्रेयोरूपमोक्षफलं श्रवणायाप्यलभ्यं दुर्दर्शं दुष्प्राप्यं नावरेण नरेण प्रोक्ते सति गम्यं परमप्रमोदास्पदं निर्मृष्टनिखिलकलुषमनन्तानन्दाद्वय रूपं धन्यं धन्यश्च तस्य जिज्ञासुः प्रष्टा द्रष्टा मन्ता कुशलः बहुपुण्यभाक् सर्वसंसाररूपप्रेयः फलसाधनसम्पत्तिषु असारत्वदर्शी महान् इति तत्र प्रारम्भमन्त्रग्रामादवगम्यते।

**रहस्यतत्त्वम्-**

आत्मा रहस्यतत्त्वम्। रहसि आत्मेतरवृत्तिव्यावृत्ते प्रशान्ते विशुद्धे मनसि गुहायां विद्यमानत्वात् उपलभ्यमानत्वाद्। यत आत्मा रहस्यमतो तद्विज्ञानमपि रहस्यम्। अतएव गीतायामुक्तं भगवता–

**स एवायं मया तेऽद्य योगः प्रोक्तः पुरातनः। भक्तोऽसि मे सखाचेति रहस्यं ह्येतदुत्तमम्॥** (गीता 4.3)

रहः शब्द एकान्तवाची। योगी युञ्जीतसततमात्मानं रहसि स्थितः (गीता 6.10) एकान्तता मनसः एकाग्रता, सा चात्मेतरवृत्तिनिरोधे सति जायते। यद्यपि आत्मा सर्वत्र व्यापकस्तथापि अनाद्यनिर्वचनीयभावरूपया अविद्यया मायाख्यया आवृतो गूढोऽतएव दुर्दर्शः दुर्लभश्चास्ति। तं दुर्दर्शं गूढमनुप्रविष्टमित्यादिश्रुतेः। नाहं प्रकाशः सर्वस्य योगमायासमावृतः इति स्मृतेश्च। किन्तु स आत्मा गुफारूपेणात्मेतरवृत्तिरहितेन प्रशान्तशुद्धेन मनसा निष्कामकर्मोपासनानुष्ठानेन दीर्घकालनैरन्तर्यसत्कारसेवित भूमिना दृढ सन् योगिभिः लभ्यते। अत आत्मतत्त्वरहस्यमित्युच्यते। **एष सर्वेषु भूतेषु गूढोत्मा न प्रकाशते। दृश्यते त्वग्र्यया बुद्धया सूक्ष्मया सूक्ष्मदर्शिभिः** (कठ. 1.3.12) इति श्रुतेः। **योगी युञ्जीत सततमात्मानं रहसि स्थितः** (गीता 6.10) इति स्मृतेश्च।

ननु कीदृशमात्मतत्त्वं रहस्यभूतं कठोपनिषदि प्रतिपादितमितिचेत्, उच्यते–

**न जायते म्रियते वा विपश्चित् नायं कुतश्चिन्न बभूव कश्चित्** (कठ. 1.2.18)
**हन्ताचेन्मन्यते हन्तुं हतश्चेन्मन्यते हतम्** (कठ. 1.2.19)

जराजन्ममरणरहितः हन्तृहन्तव्यहतादिव्यापारशून्यः सा आत्मा। अनेन नायमस्तीति चैके इति प्रश्नस्योत्तरं सम्पन्नम्। **अणोरणीयान् महतो महीयान् आत्माऽस्य जन्तोर्निहितो गुहायाम्** (कठ. 1.2.20) अणीयान् महीयांश्चात्मा। न च विरोधो, व्यापकत्वाद् अणुमहत्सु कार्यभूतेषु मिथ्यारूपेषु। **आसीनो दूरं व्रजति शयानो याति सर्वतः** (कठ. 1.2.21) अशरीरं शरीरेष्वनवस्थेष्वस्थितः (कठ. 1.2.22) इत्यादि मन्त्रेण कूटस्थता सर्वानुगतता तस्य प्रतिपाद्यते। **यस्य ब्रह्म च क्षत्रञ्चोभे भवत ओदनम्** (कठ. 1.2.25) इत्यादिना चराचरग्रहणात् सर्वस्यात्तृत्वं सर्व प्रपञ्चलयस्थानमुच्यते। **यः सेतुरीजानानामक्षरं ब्रह्म यत् परम्** (कठ. 1.3.2) अनेन यज्ञादीनामाहर्तृणां सेतुभूतमक्षरमविनाशिपरमात्मतत्त्वं प्रतिपादितं भवति। **महतः परव्यक्तमव्यक्तात् पुरुषः परः** (कठ. 1.3.11) इत्यादिना व्यक्ताव्यक्तप्रकृतिपरत्वं सूक्ष्मतमत्वं सर्वाश्रयत्वञ्चास्य प्रतिपादितं भवति। अशब्दमस्पर्शमरूपमव्ययम् (कठ. 1.3.15) इत्यादिमन्त्रेणात्मनो सर्वगुणविशेषवर्जितत्त्वं विशुद्धत्वञ्च प्रतिपादितम्। किञ्चात्मा परमात्मैव परब्रह्मणः पृथक् जीवात्मतत्त्वं नास्ति ऐक्यमेवोभयोरित्यपि कठोपनिषदि प्रतिपादितम्।

येन रूपं रसं गन्धं शब्दान् स्पर्शांश्च जिघ्रति (कठ. 2.1.3) **यदेवेह तदमुत्र यदमुत्र तदन्विह मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति** (कठ. 2.1.1) **मनसैवेदमाप्तव्यं नेह नानास्ति किञ्चन।** (कठ. 2.1.11) अङ्गुष्ठमात्रः पुरुषो मध्य आत्मनि तिष्ठति। **ईशानो भूतभव्यस्य...** (कठ. 2.1.12) **अग्निर्यथैको भुवनं प्रविष्टः रूपं रूपं प्रतिरूपो बभूव। एकस्तथा सर्वभूतान्तरात्मा रूपं रूपं प्रतिरूपो वहिश्च** (कठ. 2.2.9) **नित्योऽनित्यानां चेतनश्चेतनानाम्...** (कठ. 2.2.13) इत्येवमादिभिमन्त्रैर्जीवब्रह्मणोरैक्यं स्पष्टं प्रतिपादितम्। आत्मैव सर्वा वभासकं चैतन्यरूपं तद्भासकमन्यद् किञ्चन नास्ति। स च स्वयंप्रकाश इत्यादि।

**न तत्र सूर्यो भाति न चन्द्रतारकं नेमा विद्युतोभान्ति कुतोऽयमग्निः।**
**तमेवभान्तमनुभाति सर्वं तस्य भासासर्वमिदं विभाति॥** (कठ. 2.2.15)

इत्येवमादिर्भिमन्त्रैरूपदिष्टम्। एवं रहस्यभूतमात्मतत्त्वं नचिकेतसा तृतीयवररूपेण पृष्टं यमेनाचार्येण यथावदुपदिष्टम्।

**तत्प्राप्तिसाधनम्**

अधुना रहस्यभूतात्मतत्वाधिगमोपायस्तदुपनिषदुपदिष्ट उच्यते।

**एव सर्वेषु भूतेषु गूढोऽत्मा न प्रकाशते। दृश्यते त्वग्र्यया बुद्ध्या सूक्ष्मया सूक्ष्मदर्शिभिः॥** (कठ. 1.3.12) इति मन्त्रेण सर्वभूताशयस्थ गूढ आत्मा सूक्ष्मदर्शिभिर्योगिभिः ग्राह्य इति यदुक्तं तत् कथमिति विवेचनीयं भवति।

**यच्छेद् वाङ्मनसी प्राज्ञस्तद्यच्छेज्ज्ञान आत्मनि**
**ज्ञानमात्मनि महति नियच्छेद् तद् यच्छेच्छान्त आत्मनि** (कठ. 1.3.13)

प्राज्ञो विवेकी आत्मानात्मज्ञो वागुपलक्षितानि सर्वाणीन्द्रियाणि मनसिनियच्छेत् उपसंहरेत्। बाह्याभ्यन्तरवृत्तिं निरुध्य मनस्येव संकल्पविकल्पात्मके लयं कुर्यात्। तादृशं मनः ज्ञाने प्रकाशात्मके अध्यवसायात्मके आत्मनि बुद्धौ नियच्छेत्। मन आदि करणान्याप्रोतीत्यात्मा बुद्धिरत्रोच्यते। संकल्पविकल्पादि, आत्मतत्त्वनिश्चयात्मक बुद्धौ उपसंहरेत्। ताञ्च बुद्धिमन्तर्लीनेन्द्रिय मनोवृत्तिं व्यष्टिरूपां महति प्रथमजे हिरण्यगर्भे समष्टिरूपे उपसंहरेत्। हिरण्यगर्भो हि प्रथमजन्मा सूक्ष्मशरीरसमष्टिरूपः। यथा प्रथमजस्य तस्य विशुद्धं विज्ञानमात्मविषयकं तथात्मनो विज्ञानमुत्पादयेदितिभावः।

तं च महान्तमात्मानं शान्ते सर्वविशेषप्रत्यस्तमितरूपे निर्विशेषे अविक्रिये सर्वान्तरे सर्वबुद्धिप्रत्ययसाक्षिणि मुख्ये आत्मनि यच्छेद् उपसंहरेत्।

विषयेभ्यःशब्दादिभ्यः व्यावर्त्य इन्द्रियाणि मनसि उपसंहरेत्। संकल्पविकल्पात्मकस्य मनसः बुद्धौ लयं कुर्यात्। बुद्धेश्च स्वस्याः हिरण्यगर्भे बुद्धिसमष्टिरूपे सविशेषे ब्रह्मणि लयं कुर्यात्। तस्य च निर्विशेषे स्वस्वरूपे लयं कुर्यादित्यर्थः। एवं रूपा तस्यात्मतत्त्वस्य प्रतिपत्तिः। एवमुपायेन इन्द्रियमनोबुद्धिमहदादि सर्वमात्मनि विशुद्धे प्रविलाप्य नामरूप कर्मत्रयं यन्मिथ्याज्ञानविजृम्भितं क्रियाकारकफललक्षणं स्वात्मयाथात्म्यज्ञानेन रज्जुसर्पमिव शुक्तिरजतमिव रज्जुशुक्तिदर्शनेन स्वस्थः प्रशान्तात्मा कृतकृत्यो भवति। **महान्तं विभुमात्मानं मत्वा धीरो न शोचति** (कठ. 2.1.4)। **तमात्मस्थं येऽनुपश्यति धीरास्तेषां सुखं शाश्वतं नेतरेषाम्** (कठ 2.2.12) **यदा सर्वे प्रमुच्यन्ते कामा येऽस्य हृदि स्थिताः। अथ मर्त्योऽमृतोभवत्यत्र ब्रह्म समश्नुते** इत्यादि श्रुतिशतेभ्यः। **एतद् बुद्ध्वा बुद्धिमान्स्यात् कृतकृत्यश्च** भारत (गीता 15.20)।

**यस्त्वात्मरतिरेव स्याद् आत्मतृप्तश्च मानवः।**
**आत्मन्येव च संतुष्टस्तस्य कार्यं न विद्यते॥** (गीता 3.17) इत्यादि स्मृतिभ्यश्च।

ननु अप्रमेयस्यावाङ्मनसगोचरस्यातिसूक्ष्मस्य रूपरसादिसर्वधर्मवर्जितस्य धर्माधर्मभूतभव्यादिरहितस्य जीवात्माभिन्नस्य परब्रह्मणो दर्शनं कथं भविष्यतीति। न च मनसा, अवाङ्मनसागोचरत्वादिति चेन्न दृश्यते त्वग्र्या

बुद्ध्या इत्यादि श्रुतेः विशुद्धबुद्धिग्राह्यत्वात्। न संदृशे तिष्ठतिरूपमस्य न चक्षुषा पश्यति कश्चनैनम् हृदा मनीषा मनसाभिक्लृप्तो य एतद्विदुरमृतास्ते भवन्ति (कठ. 2.3.9) संदर्शने तस्य ब्रह्मणो रूपं न तिष्ठति, अत एवासौ प्रत्यक्षागोचरः। तथापि हृदा मनीषा मनसा अभिक्लृप्तः प्रकाशित आत्मा ज्ञातुं शक्यते। हृदा हृत्स्थया बुद्धया, पुनः कीदृश्या बुद्ध्या? मनीषा मनः संकल्पादिलक्षणं ईष्टे इति मनीट् तया अन्तर्लीनमनोव्यापारया संकल्प विकल्परहितया मनसा मनन रूपेण सम्यग्दर्शनेन प्रकाशित आत्मा लभ्यत इति भावः। यच्छेद् वाङ्मनसीत्यादिना मन्त्रेण इन्द्रियादिलयक्रमेण विशुद्धबुद्ध्यैव आत्मनो लाभ उक्तः। इन्द्रियादीनां विषयव्यावृत्तिः मनोवृत्तिनिरोधादि चैतत् सर्वं निश्चयात्मकबुद्धिकार्यमेव। अतो निगृहीतेन्द्रियमनोरूपया अग्रया बुद्धयैवात्मा द्रष्टव्यः नान्येनेत्यभिप्रायः। अतो बुद्धिरेव आत्मसाक्षात्कारसाधनम्। सैव परमागतिशब्देनोच्यते।

**यदा पञ्चावतिष्ठन्ते ज्ञानानि मनसा सह। बुद्धिश्च न विचेष्टति तामाहुः परमां गतिम्।** (कठ. 2.3.10)

यदा पञ्चज्ञानेन्द्रियाणि मनसा सह स्वस्वविषयव्यापारव्यावृत्तानि आत्मन्येवावतिष्ठन्ते। अत्र आत्मनि – बुद्धौ इत्यर्थः। आत्मनि निश्चयात्मकबुद्धिरूपे लीनानि भवन्ति। सा बुर्द्धिन विचेष्टति न विचेष्टते न स्व व्यापारं करोति तां बुद्धि परमां गतिसाधनं तत्त्वदर्शनस्याहुराचार्याः। अनेन चित्तवृत्तिनिरोधरूपोऽसंप्रज्ञातसमाधिः साधनमुक्तम्। **तं योगमिति मन्यन्ते स्थिरामिन्द्रियधारणाम्। अप्रमत्तस्तदा भवति योगो हि प्रभवाप्ययौ॥** (कठ. 2.3.11)

एतादृशं ब्रह्मेतरसर्ववृत्तिवियोगमेव योगं मन्यन्ते। सर्वानर्थसंयोगवियोगावस्था हीयं योगिनः। एतस्यामवस्थायां सर्वोपप्लववर्जितः स्वरूपप्रतिष्ठ आत्मा भवति। योगो हि उपायापायधर्मकः अतोऽप्रमत्तः सदाभवेत्।
गीतायामप्युक्तम्–

**यदा विनियतं चित्तमात्मन्येवावतिष्ठते। निःस्पृहः सर्वकामेभ्यो युक्त इत्युच्यते सदा॥** (गीता 6.18)
**यथा दीपो निवातस्थो नेङ्गते सोपमा स्मृता। योगिनो यतचित्तस्य युञ्जतो योगमात्मनः॥** (गीता 6.19)
**यं लब्ध्वा चापरं लाभं मन्यते नाधिकं ततः। यस्मिन् स्थितो न दुःखेन गुरुणाऽपि विचाल्यते॥** (गीता 6.22)
**तं विद्याद् दुःखसंयोगवियोगं योगसंज्ञितम्। स निश्चयेन योक्तव्यो योगोऽ निर्विण्णचेतसा॥** (गीता 6.23)
**शनैःशनैरूपरमेत् बुद्ध्या धृतिगृहीतया। आत्मसंस्थं मनः कृत्वा न किञ्चिदपिचिन्तयेत्॥** (गीता 6.25)

रथरूपककल्पनयाऽपि एतस्य रहस्यभूतस्यात्मत्त्वस्याधिगतिः स्पष्टं वर्णिता।

**आत्मानं रथिनं विद्धि शरीरं रथमेव तु। बुद्धिं तु सारथिं विद्धि मनः प्रग्रहमेव च॥**
**इन्द्रियाणि हयानाहुर्विषयांस्तेषु गोचराः॥** (कठ. 1.3.3-4)
**विज्ञान सारथिर्यस्तु मनः प्रग्रहवान् नरः। सोऽध्वनः परमाप्नोति तद् विष्णोः परमं पदम्॥** (कठ. 1.3.9)

आत्मा रथी, शरीरं रथः, बुद्धि सारथिः, मनः प्रग्रहः इन्द्रियाणि अश्वाः विषयाः गोचराः, आत्मेन्द्रियमनोयुक्तो भोक्ता। विज्ञानवान् सारथिः युक्तं मनः प्रग्रहः दान्ता अश्वाः यस्य सः अध्वनः परं तद् ब्रह्मपदं प्राप्नोति।

अथमर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुते (कठ. 2.3.14) इत्यादि मन्त्रेण जीवन्मुक्ति सद्भावोऽप्युच्यते। तथा ''**पुरमेकादशद्वारमजस्यावक्रचेतसः, अनुष्ठाय न शोचति विमुक्तश्च विमुच्यते** (कठ. 2.2.1) इति मन्त्रेणापि जीवन्मुक्तिरुच्यते।

इदानीं परापरब्रह्मण उपासना कठप्रोक्ता वर्ण्यते। उपासना नाम एकालम्बने समानप्रत्ययप्रवाहः। आलम्बनश्च ब्रह्मणः ओंकार एव परमात्माभिधानम्। तस्य वाचकः प्रणवः इति योग सूत्रात्।

**ओं तत् सदिति निर्देशो ब्रह्मणस्त्रिविधःस्मृतः। ब्राह्मणास्तेन वेदाश्च यज्ञाश्च विहिताः पुरा॥** (गीता 17.23)

सर्वे वेदा यत् पदमामनन्ति तपांसि सर्वाणि च यद् वदन्ति यदिच्छन्तो ब्रह्मचर्य चरन्ति तत्तेपदं संग्रहेण ब्रवीम्योमित्येतत् (कठ. 1.2.15) इत्यादि मन्त्रेण कठोपनिषदि ओंकारसंस्तुतिर्विहिता।

**एतदालम्बनं श्रेष्ठम् एतदालम्बनं परम्। एतदालम्बनं ज्ञात्वा ब्रह्मलोके महीयते॥** (कठ. 1.2.17)

**एतदेवाक्षरं ब्रह्म एतदेवाक्षरं परम्। एतदेवाक्षरं ज्ञात्वा यो यदिच्छति तस्य तत्॥** (कठ. 1.2.15)

परापर ब्रह्मप्रतीकं प्रतिरूपम् ओंकार एव। अतः ओंकारमेव ब्रह्मेति ज्ञात्वा ब्रह्मोपासीत। तदुपासनया चान्तः करणे शुद्धे ब्रह्मप्राप्तिः। एवं रहस्यमात्मतत्त्वं तत्प्रतीकमालम्बनमुपासनं तत् साधनं योगरूपं फलश्चैतत् सर्वं यमेन प्रशस्ताचार्येण नचिकेतसे योग्याय शिष्यायोपदिष्टम्। अतिमहत्वपूर्णेयपुनिषद्। प्रत्यध्यायबल्लीत्रयविलसिताध्यायद्वय विभक्ता।

**जीवब्रह्मणोरैक्यम्**

रहस्यभूतमात्मतत्त्वमद्वैतम्। कठोपनिषदि तथैव प्रतिपादनात्। ननु नचिकेतसा वरत्रयं याचितम्। प्रथमः पितृसौमनस्यं, द्वितीयोऽग्निज्ञानं, तृतीय आत्मविज्ञानम्। तृतीयवररूपेण ''येयं प्रेतेविचिकित्सा मनुष्ये'' इत्यादिना जीवात्मविषयकः प्रश्न उपस्थापितः। तथा **''अन्यत्रभूताच्च भव्याच्च यत्तत् पश्यसि तद् वद''** इत्यपि प्रश्न उपस्थापितः। तत्र स्पष्टमेव पूर्वमन्त्रस्य जीवात्मा विषयः, अन्यस्य च परमात्मेति द्वयोः प्रश्नयोर्भिन्नविषयतास्ति। तृतीयवररूपेण प्रश्नद्वयमुपस्थापितमिति। तत् कथमुच्यते जीवात्मपरमात्मनोरैक्यमिति चेन्न। अन्यत्रधर्मादित्यादिना यः प्रश्नः कृतः स च पूर्वप्रश्नस्यैवानुकर्षो नात्र भिन्नविषयता। कुत एतदवगम्यते यत् जीवात्मविषयकप्रश्नस्यैव विशेषरूपेणजिज्ञासायामुत्तरप्रश्नः ''अन्यत्रधर्मादित्यादिनानुकृष्यते इति? जीवात्मपरमात्मनोरेकत्वाभ्युपगमात्। तत्त्वमसीत्यादिश्रुतेः'' (छा. 6.1) **'क्षेत्रज्ञं चापि मां विद्धि सर्वक्षेत्रेषु भारत'** (गीता 6.25) इत्यादि स्मृतेश्च। इहापि कठोपनिषदि उभयोरैक्यमवगम्यते। अन्यत्रधर्मादित्यादि प्रश्नस्य **'न जायते म्रियते वा विपश्चिदि'** त्यादिना उत्तर दर्शनात्। उत्तरवाक्यं तु जीवात्मविषयकम्। परमात्मनो जन्ममरणप्रसङ्गादर्शनात्। प्रसक्तं हि प्रतिषिद्धयते। प्रसक्तं च जीवात्मनि जन्मादि अतः उत्तरवाक्येन न जायते इत्यादिना जीवात्मनः प्रसक्तजन्ममरणादिप्रतिषेधेन ब्रह्मरूपत्वं प्रतिपाद्यते इति गम्यते। महान्तं विभुमात्मानं मत्वा धीरो न शोचतीत्यादिना जीवस्य महत्त्वविभुत्वादि प्रति शोकविमोकं वदन्ती श्रुतिस्पष्टमेवाद्वैतं प्रतिपादयति। नहि द्वयोर्जीवप्राज्ञयोः विभुत्वमहत्वादि प्रतिपादने द्वयोर्वा तथा विज्ञानेन शोकविमोके कठश्रुतेस्तात्पर्यमवधारयितुं शक्यते।

**तथा यदेवेह तदमुत्र यदमुत्र तदन्विह। मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति॥**(कठ. 2.4.20)

इत्यादि मन्त्रेण स्पष्टमेव नानात्वं निषेधता जीवात्मपरमात्मनोरभेदः प्रतिपाद्यते। यद्येवं तर्हि अन्यत्रधर्मादित्यादि प्रश्नान्तरस्य कोऽवकाश इति चेद्, उच्यते, येयं प्रेते इत्यादि प्रश्नेन लोकविवादित परलोकसम्बन्धिता जिज्ञासिता 'आत्मनोदेहादिव्यतिरिक्तास्तित्वमस्ति नास्तीति। उत्तरत्रान्यत्रधर्मादित्यादिना तस्यैव पूर्वप्रश्नविषयस्य जीवात्मनोऽसंसारित्वं जिज्ञासितम् इति भवति प्रश्नस्यावकाशः एकस्मिन् विषयेऽपि बहुधाप्रश्नसम्भवात्। भिन्नविषयक प्रश्नान्तरकल्पने च पूर्वं यमाचार्यकृतशिष्यप्रलोभनप्रशंसादि व्यर्थं स्यात्। अतः कठोपनिषदि जीवप्राज्ञयोरभेद प्रतिपादित इति गम्यते। एतत् तत्त्वं प्रतिपादितं भगवत्पादैः आनुमानिकाधिकारणे **'त्रयाणामेव चैवमुपन्यासः प्रश्नश्च** (ब्रह्मसूत्र. 1.4.1) **सूक्ष्मं तु तदर्हत्वात्** (ब्रह्मसूत्र. 1.4.2) **तदधीनत्वादर्थवद्** (ब्रह्मसूत्र. 1.4.3) इति सूत्रैः। इति शम्।

* * *